राजनि० । २अतिबलायां स्त्री टाप् । शैलेये न० अर्क-
वृक्षे पु० राजनि० ।

**शीतप्रभ** पु० शीतस्य हिमस्येव प्रभा यस्य । कर्पूरे राजनि०

**शीतप्रिय** पु० ६त० । पर्पटे राजनि० । [च राजनि० ।

**शीतफल** पु० शीतं शीतवीर्यकरं फलमस्य । १उदुम्बरे २शेलौ

**शीतबला** स्त्री शीतं बलं वीर्य्यं यस्याः ५ब० । महासम-
ङ्गायां राजनि० । [च शब्दर० ।

**शीतभानु** पु० शीताः शीतलाभानयोऽस्य । १चन्द्रे २कर्पूरे

**शीतभीरु** स्त्री ५त० । १मल्लिकायाम् अमरः । २शीतभीते त्रि०

**शीतमञ्जरी** स्त्री शीतकाले मञ्जरी यस्याः न कप् । शेफा०
लिकायां राजनि० ।

**शीतमयूख** पु० शीता मयूखा यस्य । १चन्द्रे २कर्पूरे च
मेदि० । शीतमरीच्यादयोऽप्यत्र शब्दर० ।

**शीतमूलक** न० शीतं शीतवीर्यकरं मूलमस्य कप् । १उशीरे
(वेणारमूल) राजनि० । २शीतलमूलयुते त्रि० ।

**शीतरश्मि** पु० शीतारश्मयोऽस्य । १चन्द्रे २कर्पूरे च ज्यो०त

**शीतल** पु० शीतं लाति ला-क शीतमस्त्यस्य लच् वा । १शी०
तस्पर्शे २तद्वति त्रि० । ३मलयोद्भवे चन्दने न० ४शैलेये-
५पुष्पकासीसे च मेदि० । ६पद्मके ७मौक्तिके राजनि० ।
८वीरणमूले न० शब्दच० । ९असनपर्य्यामृ अमरः । १०ब
ञ्जुवारवृक्षे ११चम्पके १२राले १३चन्द्रे १४कर्पूरे
पु० राजनि० । [पु० राजनि० ।

**शीतलक** न० शीतलमिव इवार्थे कन् । १श्वेतोत्पले २मरुवके

**शीतलच्छद** पु० शीतलः शीतलस्पर्शवान् छदोऽस्य । १चम्पके-
राजनि० । कर्म० । २शीतले पत्त्रे पु० ।

**शीतलजल** न० शीतलं जलं यस्मात् ५ब० । १उत्पले
राजनि० । कर्म० । २शीतले वारिणि न० ।

**शीतलवातक** पु० शीतलोवातो धातुभेदो यस्मात् कप् ।
असनपर्ण्यां शब्दच० । तत्सेवने हि वायोः शीतलता ।

**शीतला** स्त्री १देवीभेदे "नमामि शीतलां देवीं रासभस्थां
दिगम्बरीम् । मार्जनीकलसोपेतां सूर्पालङ्कृतमस्तकाम्"
स्कान्दपु० । सा च विस्फोटकभेदनाशिनी । २जलजवृक्ष-
भेदे रत्नमा० तत्र ङीप् । ३कुटुम्बिनीवृक्षे ४आरा-
मशीतलायां ५बालुकायां स्त्री राजनि० टाप् ।

**शीतवल्क** पु० शीतः शीतकरः वल्कोऽस्य । उदुम्बुरे राजनि०

**शीतवीर्य्यक** पु० शीतं शीतलकरं वीर्यं यस्मात् ५ब० । कप् ।
१प्लक्षवृक्षे राजनि० । २शीतलवीर्य्यकरे त्रि० ।

**शीतशिव** न० शीतं शीतलमपि शिवम् । १सैन्धवलवणे २शैले-
यनामगन्धद्रव्ये अमरः । ३मिश्रेयायां ४शमीवृक्षे च स्त्री
राजनि० ५सक्तुफलवृक्षे मेदि० ६मधुरिकायां पु० अमरः ।

**शीतसह** पु० शीतं सहते सह-अच् । १पीलुवृक्षे शब्दच० ।
२नीलसिन्धुवारे ३वासन्त्यां स्त्री राजनि० टाप् ।

**शीता** स्त्री श्यै-क्त सम्प्र० । १लाङ्गलपद्धतौ भरतः २राम-
पत्न्यां शब्दच० ३अतिबलायां ४कुटुम्बिन्यां ५दूर्वायां
६शिल्लिकाख्ये राजनि० ।

**शीतांशु** पु० शीताः अंशवो यस्य । १चन्द्रे २कर्पूरे च राजनि०

**शीताङ्गी** स्त्री शीतमङ्गमस्याः ङीष् । १हंसपदीवृक्षे रा-
जनि० २शीतलदेहयुते त्रि० स्त्रियां ङीष् ।

**शीताद** पु० शीतमादत्ते आ+दा-क । दन्तमूलगते रोगभेदे
दन्तरोगशब्दे ३४६६ पृ० दृश्यम् ।

**शीतार्त्त** त्रि० शीतेन ऋतः । शीतार्त्तौ जटा० ।

**शीतालु** त्रि० शीत+अस्त्यर्थे आलुच् । शीतबाधायुक्ते जटा० ।

**शीतावला** स्त्री शीतमावलयति आ+वल-णिच्-अण् ।
महासमङ्गायां राजनि० ।

**शीताश्मन्** पु० कर्म० । चन्द्रकान्तमणौ राजनि० ।

**शीतीभाव** पु० शीत+अभूततद्भावे च्वि-भू-भावे घञ् । मोक्षे
त्रिका० । तत्र तापत्रयशून्यत्वात्तथात्वम् ।

**शीतोत्तम** न० शीतमुत्तमं यत्र । जले शब्दच० ।

**शीत्कार** पु० शीदित्यस्य कारः शीत्+कृ-घञ् । स्त्रीणां रति
काले अव्यक्ते ध्वनिभेदे जटा० । [अमरः ।

**शी(सी)त्य** त्रि० शी(सी)ताम् अर्हति यत् । हलकृष्ये क्षेत्रादौ

**शीधु** पु० न० । शी-धुक् । इक्षुरसजाते मद्यभेदे अमरः ।

**शीधुगन्ध** पु० शीधोरिव गन्धोऽस्य । बकुलवृक्षे त्रिका० ।

**शीन** त्रि० श्यै-क्त सम्प्र० तस्य नः । १घनीभूते घृतादौ २मूर्खे
३अजगरे च पु० मेदि० । [शीभते अशीभिष्ट ।

**शीभ** कथने भ्वा० आत्म०सक० सेट् ऋदित् चङि न ह्रस्वः ।

**शीर** पुं स्त्री० शी-रक् । अजगरसर्पे शब्दच० स्त्रियां ङीष् ।

**शीरिन्** पु० शीरस्तदाकारोऽस्त्यस्य । हरिदर्भे राजनि० ।

**शीर्ण** त्रि० शॄ-क्त । १कृशे २शुष्कताप्राप्ते च मेदि० ३स्थौ
णेयके भावप्र० ।

**शीर्णपत्त्र** पु० शीर्णं पत्त्रमस्य । १कर्णिकारवृक्षे शब्दच० ।
२निम्बे ३पट्टिकालोध्रे च राजनि० ४विशीर्णपत्त्रयुक्ते
त्रि० । कर्म० । ५विशीर्णे पर्णे न० ।

**शीर्णपर्ण** पु० शीर्णं पर्णमस्य । १निम्बे राजनि० २विशी-
र्णपत्त्रयुक्ते त्रि० कर्म० । ३विशीर्णे पत्त्रे न० ।

**शीर्णपाद** पु० शीर्णः पादोऽस्य भाटयापात् । शनैश्चरे